# Mantragarbha Dattatreya Ashtottarashatanama Stotram

# મન્ત્રગર્ભ દત્તાત્રેયાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : dattAtreyAShTottarashatanAmastotram

File name : mantragarbhadatta108str.itx

Category : aShTottarashatanAma, deities_misc, dattAtreya, stotra, vAsudevAnanda-sarasvatI, mantra

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI

Transliterated by : Arun Shantharam shantharam.arun at gmail.com

Proofread by : Arun Shantharam shantharam.arun at gmail.com

Latest update : April 7, 2009

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 23, 2023

*sanskritdocuments.org*

# મન્ત્રગર્ભ દત્તાત્રેયાષ્ટોત્તરશતનામસ્તોત્રમ્

ઓંકારતત્ત્વરૂપાય દિવ્યજ્ઞાનાત્મને નમઃ ।
નભોતીતમહાધામ્ન ઐંદ્ર્યૃધ્યા ઓજસે નમઃ ॥ ૧॥

નષ્ટમત્સરગમ્યાયાગમ્યાચારાત્મવર્ત્મને ।
મોચિતામેધ્યકૃતયે ર્હ્રીંબીજશ્રાણિતશ્રિયે ॥ ૨॥

મોહાદિવિભ્રમાન્તાય બહુકાયધરાય ચ ।
ભત્તદુર્વૈભવછેત્રે ક્લીંબીજવરજાપિને ॥ ૩॥

ભવહે- તુવિનાશાય રાજચ્છોણાધરાય ચ ।
ગતિપ્રકમ્પિતાણ્ડાય ચારુવ્યહતબાહવે ॥ ૪॥

ગતગ- ર્વપ્રિયાયાસ્તુ યમાદિયતચેતસે ।
વશિતાજાતવશ્યાય મુણ્ડિને અનસૂયવે ॥ ૫॥

વદદ્વ- રેણ્યવાગ્જાલા-વિસ્પૃષ્ટવિવિધાત્મને ।
તપોધનપ્રસન્નાયે-ડાપતિસ્તુતકીર્તયે ॥ ૬॥

તેજોમણ્યન્તરઙ્ગાયા-દ્મરસદ્મવિહાપને ।
આન્તરસ્થાનસંસ્થાયાયૈશ્વર્યશ્રૌતગીતયે ॥ ૭॥

વાતાદિભયયુગ્ભાવ-હેતવે હેતુબેતવે ।
જગદાત્માત્મભૂતાય વિદ્વિષત્ષટ્કઘાતિને ॥ ૮॥

સુરવ-ર્ગોદ્ધૃતે ભૃત્યા અસુરાવાસભેદિને ।
નેત્રે ચ નયનાક્ષ્ણે ચિચ્ચેતનાય મહાત્મને ॥ ૯॥

દેવાધિદેવદેવાય વસુધાસુરપાલિને ।
યાજિનામગ્રગણ્યાય દ્રાંબીજજપતુષ્ટયે ॥ ૧૦॥

વાસનાવનદાવાય ધૂલિયુગ્દેહમાલિને ।
યતિસંન્યાસિગતયે દત્તાત્રેયેતિ સંવિદે ॥ ૧૧॥

યજનાસ્યભુજેજાય તારકાવાસગામિને ।
મહાજવાસ્પૃગ્રૂપાયા-ત્તાકારાય વિરૂપિણે ॥ ૧૨॥

નરાય ધીપ્રદીપાય યશસ્વિયશસે નમઃ ।
હારિણે ચોજ્વલાઙ્ગાયાત્રેસ્તનૂજાય સમ્ભવે ॥ ૧૩॥

મોચિતામરસઙ્ઘાય ધીમતાં ધીરકાય ચ ।
બલિષ્ઠવિપ્રલભ્યાય યાગહોમપ્રિયાય ચ ॥ ૧૪॥

ભજન્મહિમવિખ્યાત્રેઽમરારિમહિમચ્છિદે ।
લાભાય મુણ્ડિપૂજ્યાય યમિને હેમમાલિને ॥ ૧૫॥

ગતોપાધિવ્યાધયે ચ હિરણ્યાહિતકાન્તયે ।
યતીન્દ્રચર્યાં દધતે નરભાવૌષધાય ચ ॥ ૧૬॥

વરિષ્ઠયોગિપૂજ્યાય તન્તુસન્તન્વતે નમઃ ।
સ્વાત્મગાથાસુતીર્થાય મઃશ્રિયે ષટ્કરાય ચ ॥ ૧૭॥

તેજોમયોત્તમાઙ્ગાય નોદનાનોદ્યકર્મણે ।
હાન્યાપ્તિમૃતિવિજ્ઞાત્ર ઓંકારિતસુભક્તયે ॥ ૧૮॥

રુક્ષુડ્મનઃખેદહૃતે દર્શનાવિષયાત્મને ।
રાંકવાતતવસ્ત્રાય નરતત્ત્વપ્રકાશિને ॥ ૧૯॥

દ્રાવિતપ્રણતાઘાયા-ત્તઃસ્વજિષ્ણુઃસ્વરાશયે ।
રાજન્ત્યાસ્યૈકરૂપાય મઃસ્થાયમસુબન્ધવે ॥ ૨૦॥

યતયે ચોદનાતીત- પ્રચારપ્રભવે નમઃ ।
માનરોષવિહીનાય શિષ્યસંસિદ્ધિકારિણે ॥ ૨૧॥

ગઙ્ગે પાદવિહીનાય ચોદનાચોદિતાત્મને ।
યવીયસેઽલર્કદુઃખ-વારિણેઽખણ્ડિતાત્મને ॥ ૨૨॥

હ્રીંબીજાયાર્જુનજ્યેષ્ઠાય દર્શનાદર્શિતાત્મને ।
નતિસન્તુષ્ટચિત્તાય યતિને બ્રહ્મચારિણે ॥ ૨૩॥

ઇત્યેષ સત્સ્તવો વૃત્તોયાત્ કં દેયાત્પ્રજાપિને ।
મસ્કરીશો મનુસ્યૂતઃ પરબ્રહ્મપદપ્રદઃ ॥ ૨૪॥

॥ ઇતિ શ્રી. પ. પ. શ્રીવાસુદેવાનન્દ સરસ્વતી વિરચિતં
મન્ત્રગર્ભ શ્રી દત્તાત્રેયાષ્ટોત્તરશતનામ સ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Arun Shantharam shantharam.arun@ gmail.com
See accompanying colorcoded PDF file to see how the stotra is built creativly.
Starting lettter of each quarter of the line vertically forms a
mantra of different deity.

---

*Mantragarbha Dattatreya Ashtottarashatanama Stotram*

pdf was typeset on June 23, 2023

Please send corrections to *sanskrit@cheerful.com*